# ॥ वाल्मीकि रामायण ॥

## ३ अरण्यकाण्ड

### अध्याय ६१

तप्यमानं तथा रामं सीताहरणकर्शितम् ।
लोकानामभवे युक्तं साम्वर्तकमिवानलम् ॥ १॥

वीक्षमाणं धनुः सज्यं निःश्वसन्तं मुहुर्मुहुः ।
हन्तुकामं पशुं रुद्रं क्रुद्धं दक्षक्रतौ यथा ॥ २॥

अदृष्टपूर्वं सङ्क्रुद्धं दृष्ट्वा रामं स लक्ष्मणः ।
अब्रवीत्प्राञ्जलिर्वाक्यं मुखेन परिशुष्यता ॥ ३॥

पुरा भूत्वा मृदुर्दान्तः सर्वभूतहिते रतः ।
न क्रोधवशमापन्नः प्रकृतिं हातुमर्हसि ॥ ४॥

चन्द्रे लक्ष्णीः प्रभा सूर्ये गतिर्वायौ भुवि क्षमा ।
एतच्च नियतं सर्वं त्वयि चानुत्तमं यशः ॥ ५॥

न तु जानामि कस्यायं भग्नः साङ्ग्रामिको रथः ।
केन वा कस्य वा हेतोः सायुधः सपरिच्छदः ॥ ६॥

खुरनेमिक्षतश्चायं सिक्तो रुधिरबिन्दुभिः ।
देशो निवृत्तसङ्ग्रामः सुघोरः पार्थिवात्मज ॥ ७॥

एकस्य तु विमर्दोऽयं न द्वयोर्वदतां वर ।
न हि वृत्तं हि पश्यामि बलस्य महतः पदम् ॥ ८॥

नैकस्य तु कृते लोकान्विनाशयितुमर्हसि ।
युक्तदण्डा हि मृदवः प्रशान्ता वसुधाधिपाः ॥ ९॥

सदा त्वं सर्वभूतानां शरण्यः परमा गतिः ।
को नु दारप्रणाशं ते साधु मन्येत राघव ॥ १०॥

सरितः सागराः शैला देवगन्धर्वदानवाः ।
नालं ते विप्रियं कर्तुं दीक्षितस्येव साधवः ॥ ११॥

येन राजन्हृता सीता तमन्वेषितुमर्हसि ।
मद्द्वितीयो धनुष्पाणिः सहायैः परमर्षिभिः ॥ १२॥

समुद्रं च विचेष्यामः पर्वतांश्च वनानि च ।
गुहाश्च विविधा घोरा नलिनीः पार्वतीश् च ह ॥ १३॥

देवगन्धर्वलोकांश्च विचेष्यामः समाहिताः ।
यावन्नाधिगमिष्यामस्तव भार्यापहारिणम् ॥ १४॥

न चेत्साम्ना प्रदास्यन्ति पत्नीं ते त्रिदशेश्वराः ।
कोसलेन्द्र ततः पश्चात्प्राप्तकालं करिष्यसि ॥ १५॥

शीलेन साम्ना विनयेन सीतां
नयेन न प्राप्स्यसि चेन्नरेन्द्र ।
ततः समुत्सादय हेमपुङ्खैर्
महेन्द्रवज्रप्रतिमैः शरौघैः ॥ १६॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com